Astro • Puja • Vastu

|| श्री गणेशाय नमः ||

हरी ॐ धार्मिक पूजा विधी केंद्र

ज्योतिष आणि वास्तु सल्लागार

# श्री गंगा स्तोत्र

देवि सुरेश्वरि भगवति गंगे त्रिभुवनतारिणि तरलतरंगे । शंकरमौलिविहारिणि विमले मम मतिरास्तां तव पदकमले ।।1।।

भागीरथि सुखदायिनि मातस्तव जलमहिमा निगमे ख्यातः । नाहं जाने तव महिमानं पाहि कृपामयि मामज्ञानम् ।।2।।

हरिपदपाद्यतरंगिणि गंगे हिमविधुमुक्ताधवलतरंगे । दूरीकुरु मम दुष्कृतिभारं कुरु कृपया भवसागरपारम् ।।3।।

तव जलममलं येन निपीतं परमपदं खलु तेन ग्रहीतम् । मातर्गङ्गेत्वयि यो भक्तः किल तं द्रष्टुं न यमः शक्तः ।।4।।

पतितोद्धारिणि जाह्नवि गंगे खण्डितगिरिवरमण्डितभंगे । भीष्मजननि हे मुनिवरकन्ये पतितनिवारिणि त्रिभुवनधन्ये ।।5।।

कल्पलतामिव फलदां लोके प्रणमति यस्त्वां न पतति शोके । पारावारविहारिणि गंगे विमुखयुवतिकृततरलापांगे ।।6।।

तव चेन्मातः स्त्रोतः स्नातः पुनरपि जठरे सोपि न जातः । नरकनिवारिणी जाह्नवि गंगेकलुषविनाशिनि महिमोत्तुंगे ।।7।।

पुनरसदंगे पुण्यतरंगे जय जय जाह्नवि करुणापांगे । इंद्रमुकुटमणिराजितचरणे सुखदे शुभदे भृत्यशरण्ये ।।8।।

रोगं शोकं तापं पापं हर मे भगवति कुमतिकलापम् । त्रिभुवनसारे वसुधाहारे त्वमसि गतिर्मम खलु संसारे ।।9।।

अलकानन्दे परमानन्दे कुरु करुणामयि कातरवन्द्ये । तव तटनिकटे यस्य निवासः खलु वैकुण्ठे तस्य निवासः ।।10।।

वरमिह नीरे कमठो मीनः किं वा तीरे शरटः क्षीणः । अथवा श्वपचो मलिनो दीनस्तव न हि दूरे नृपतिकुलीनः ।।11।।

भो भुवनेश्वरि पुण्ये धन्ये देवि द्रवमयि मुनिवरकन्ये । गंगास्तवमिमममलं नित्यं पठति नरो यः स जयति सत्यम् ।।12।।

येषां हृदये गंगाभक्तिस्तेषां भवति सदा सुखमुक्तिः । मधुराकांतापज्झटिकाभिः परमानन्दकलितललिताभिः ।।13।।

गंगास्तोत्रमिदं भवसारं वाञ्छितफलदं विमलं सारम् । शंकरसेवकशंकररचितं पठति सुखी स्तव इति च समाप्तः ।।14।।

HARI OM DHARMIK PUJA VIDHI KENDRA

योगेशशास्त्री ढवळे (गुरुजी) : 95944 28749 | निलेशशास्त्री ढवळे (गुरुजी) : 86524 02078

**SANPADA OFFICE**
Office No.8, 1st Flr, Shiva Triveni Galleria CHS.,
Plot No. 13, Sector 8, Sanpada, Navi Mumbai

**GOVANDI OFFICE**
Shri Swaybhu Hanuman Mandir, Deonar
Mahanagarpalika Vasahat, Govandi, Mumbai.

hariom astrologers | hariom astrologers | hariom_astrologers

hariomastrologers@gmail.com | www.hariomastrologers.com